শ্রীঃ
শ্রীমতে রামানুজায নমঃ
শ্রীমতে নিগমান্তমহাদেশিকায নমঃ
শ্রীগুরুপৱনপুরাধীশায শ্রীকৃষ্ণায পরব্রহ্মণে নমঃ

শ্রী মেল্পত্তূর্ নারাযণভট্টতিরেঃ কৃতিষু

# ॥শ্রীমন্নারাযণীযে ষষ্টিতমং দশকম্॥

*This document has been prepared by*

*Sunder Kidāmbi*

*with the blessings of*

শ্রী রঙ্গরামানুজ মহাদেশিকন্

*His Holiness śrīmad āṇḍavan śrīraṅgam*

শ্রীঃ

শ্রীমতে রামানুজায নমঃ

শ্রীমতে নিগমান্তমহাদেশিকায নমঃ

# ॥শ্রীমন্নারাযণীযে ষষ্টিতমং দশকম্॥

## গোপীৱস্ত্রাপহরণৱর্ণনম্

মদনাতুরচেতসোঽন্ৱহং
ভৱদঙ্ঘ্রিদ্ৱযদাস্যকাম্যযা।
যমুনাতটসীম্নি সৈকতীং
তরলাক্ষ্যো গিরিজাং সমার্চিচন্॥ **60.1** ॥

তৱ নামকথারতাঃ সমং
সুদৃশঃ প্রাতরুপাগতা নদীম্।
উপহারশতৈরপূজযন্
দযিতো নন্দসুতো ভৱেদিতি॥ **60.2** ॥

ইতি মাসমুপাহিতৱ্রতা -
স্তরলাক্ষীরভিৱীক্ষ্য তা ভৱান্।
করুণামৃদুলো নদীতটং
সমযাসীত্তদনুগ্রহেচ্ছযা॥ **60.3** ॥

নিযমাৱসিতৌ নিজাম্বরং
তটসীমন্যৱমুচ্য তাস্তদা।
যমুনাজলখেলনাকুলাঃ
পুরতস্ত্বামৱলোক্য লজ্জিতাঃ॥ **60.4** ॥

ত্রপযা নমিতাননাস্ৱথো
ৱনিতাস্ৱম্বরজালমন্তিকে।

নিহিতং পরিগৃহ্য ভূরুহো
ৱিটপং ৎৱং তরসাঽধিরূঢৱান্॥ **60.5**॥

ইহ তাৱদুপেত্য নীযতাং
ৱসনং ৱঃ সুদৃশো যথাযথম্।
ইতি নর্মমৃদুস্মিতে ৎৱযি
ব্রুৱতি ৱ্যামুমুহে ৱধূজনৈঃ॥ **60.6**॥

অযি জীৱ চিরং কিশোর ন -
স্তৱ দাসীরৱশীকরোষি কিম্।
প্রদিশাম্বরমম্বুজেক্ষণে -
ত্যুদিতস্ত্বং স্মিতমেৱ দত্তৱান্॥ **60.7**॥

অধিরুহ্য তটং কৃতাঞ্জলীঃ
পরিশুদ্ধাঃ স্বগতীর্নিরীক্ষ্য তাঃ।
ৱসনান্যখিলান্যনুগ্রহং
পুনরেৱং গিরমপ্যদা মুদা॥ **60.8**॥

ৱিদিতং ননু ৱো মনীষিতং
ৱদিতারস্ত্বিহ যোগ্যমুত্তরম্।
যমুনাপুলিনে সচন্দ্রিকাঃ
ক্ষণদা ইত্যবলাস্ত্বমূচিৱান্॥ **60.9**॥

উপকর্ণ্য ভৱন্মুখচ্যুতং
মধুনিষ্যন্দি ৱচো মৃগীদৃশঃ।
প্রণযাদযি ৱীক্ষ্য ৱীক্ষ্য তে
ৱদনাব্জং শনকৈর্গৃহং গতাঃ॥ **60.10**॥

ইতি নন্ৱনুগৃহ্য ৱল্লৱী -
র্ৱিপিনান্তেষু পুরেৱ সঞ্চরন্।

করুণাশিশিরো হরে হর
ত্বরযা মে সকলামযাৱলিম্॥ **60.11**॥

॥ ইতি শ্রীমন্নারাযণীযে ষষ্টিতমং দশকং সমাপ্তম্॥